त्वम् । अहम् । यूयम् । वयम् । तुभ्यम् । मह्यम् । युष्मभ्यम् । अस्मभ्यम् । त्वत् । मत् । युष्मत् । अस्मत् । तव । मम । युष्माकम् । अस्माकम् ।

शेषग्रहणं विस्पष्टार्थम् । शेषे लोपे कृते स्त्रियां टाप् कस्मान् न भवति, त्वं ब्राह्मणी, अहं ब्राह्मणी ? [1]'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'[2] (व्या. प. १२), अलिङ्गे वा युष्मदस्मदी इति । केचित्तु शेषे [3]लोपं टिलोपमिच्छन्ति । कथम् ? वक्ष्यमाणादेशापेक्षः शेषः, ते चादेशा मपर्यन्तस्य (७.२.९१/३८३) [4]विधीयन्ते, तेन मपर्यन्ताद् योऽन्यः स शेषः [5]इति । [6]तत्रायं लोपः इति [7]टिलोपो भवति[8] ॥

## मपर्यन्तस्य । (९१/३८३)

[9]मपर्यन्तस्य इत्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामो मपर्यन्तस्य इत्येवं तद् वेदितव्यम् । वक्ष्यति – 'युवावौ द्विवचने' (७. २. ९२/३८६) । युवाम् । आवाम् । मपर्यन्तस्य इति किम् ? युवकाम्, आवकाम् इति साकच्कस्य मा भूत् । 'त्वमावेकवचने' (७.२.९७/३८९) त्वया । मया । मपर्यन्तस्य इति किम् ? सर्वस्य मा भूत् । तथा च सति त्वमयोरकारस्य 'योऽचि' (७.२.८९/३९२) इति यकारे कृते अनिष्टं रूपं स्यात् । मान्तस्य [10]इत्येव सिद्धे अस्मिन् यत् परिग्रहणं कृतम्, अवधिद्योतनार्थं तत् । मान्ते मा भूत् । कदा ? यदा ण्यन्तयोः क्विपि मान्तत्वं विद्यते युष्मदस्मदोः । स्थानिवत्त्वं च णेरत्र क्वौ लुप्तत्वान् न विद्यते ॥

## युवावौ द्विवचने । (९२/३८६)

द्विवचने इत्यर्थग्रहणम् । द्विवचने ये युष्मदस्मदी द्व्यर्थाभिधानविषये तयोः मपर्यन्तस्य स्थाने युव आव इत्येतावादेशौ भवतः । युवाम् । आवाम् । युवाभ्याम् । आवाभ्याम् । युवयोः । आवयोः ।

[11]यदा समासे द्व्यर्थे युष्मदस्मदी भवतः, समासार्थस्यान्यसङ्ख्यत्वात् एकवचनं बहुवचनं वा भवति, तदापि [12]द्व्यर्थयोः युष्मदस्मदोः युवावौ भवतः, यदि 'त्वाहौ सौ' (७.२.९४/३८४) इत्येवमादिना आदेशान्तरेण न बाध्येते । अतिक्रान्तं युवाम् अतियुवाम् । [13]अत्यावाम् । अतिक्रान्तान् युवाम् अतियुवान् । अत्यावान् । [14]अतिक्रान्तेन युवाम् अतियुवया । अत्यावया । अतिक्रान्तैर्युवाम् अतियुवाभिः । अत्यावाभिः । अतिक्रान्तेभ्यो युवाम् [15]अतियुवभ्यम्[16] । अत्यावभ्यम्[17] । अतिक्रान्ताद् युवाम् अतियुवत् । अत्यावत् । अतिक्रान्तेभ्यो युवाम् अतियुवत् । अत्यावत् । अतिक्रान्तानां युवाम् अतियुवाकम् । अत्यावाकम् । अतिक्रान्ते युवाम् अतियुवयि । अत्यावयि । अतिक्रान्तेषु युवाम् अतियुवासु । अत्यावासु ।

त्वाहादीनां तु विषये परत्वात् ते एव भवन्ति । अतिक्रान्तो युवाम् अतित्वम् । अत्यहम् । अतिक्रान्ता युवाम् अतियूयम् । अतिवयम् । अतिक्रान्ताय युवाम् अतितुभ्यम् । अतिमह्यम् । अतिक्रान्तस्य युवाम् अतितव । अतिमम ।

यदा तु युष्मदस्मदी एकत्वबहुत्वयोर्वर्तेते, समासार्थस्तु द्वित्वे, तदा युवावौ न भवतः । अतिक्रान्तौ त्वाम् अतित्वाम् । अतिमाम् । अतिक्रान्तौ युष्मान् अतियुष्मान् । अत्यस्मान् । एवमुन्नेयम् ॥

---

1. सन्निपातपरिभाषया न भवति क. 2. इति न भवति इत्यधिकम् ह. 3. लोपे ड. 4. विधीयन्ते नास्ति इ. 5. इति नास्ति क. 6. तत्र शेषे अयं क. 7. टिलोपो नास्ति ह. 8. इति इत्यधिकम् ब. 9. अधिकारोऽयम् क. 10. इत्येवं सिद्धे क. 11. यदापि इ. 12. द्व्यर्थयोः युष्मदस्मदोः नास्ति क. इ. ह. 13. अतिक्रान्तं आवाम् अत्यावाम् इ. 14. अतिक्रान्तेन–अत्यावाभिः नास्ति क. 15–17. देहि इत्यधिकम् क.